*To* PREY, *v. a.* (Seize and devour) आमिषं धृत्वा or हत्वा भक्ष् or खाद् or ग्रस्.—(Corrode) क्रमशः क्षि in caus. or नश् in caus. —(Prey upon) लुण्ट् or लुण्ठ्. *See To* PLUNDER.

PRIAPISM, *s.* ध्वजोच्छ्रायः, ध्वजोच्छ्रयः, शिश्नोच्छ्रयः, लिङ्गोच्छ्रायः.

PRICE, *s.* (Value set or paid) मूल्यं, अर्घः, अवक्रयः, वस्नः, भाटकः, पण्यं, पणता; 'high price,' बहुमूल्यं, महामूल्यं, दुर्मूल्यं, महार्घः, महार्घ्यं; 'low price,' अल्पमूल्यं, सुमूल्यं; 'what is the price?' कियता मूल्येन विक्रीयते; 'I will not give such a price,' एतावन् मूल्यं न दित्सामि.—(Reward, recompense) फलं, वेतनं.

PRICED, *a.* (High-priced) महामूल्यः -ल्या -ल्यं, दुर्मूल्यः &c., बहुमूल्यः &c., महार्घः -र्घा -र्घं, महार्घ्यः -र्घ्या -र्घ्यं.—(Low-priced) अल्पमूल्यः &c., अल्पार्घः -र्घा -र्घं, सुमूल्यः &c.

PRICELESS, *a.* अनर्घ्यः -र्घ्या -र्घ्यं, अनर्घः -र्घा -र्घं, अमूल्यः -ल्या -ल्यं.

*To* PRICK, *v. a.* (Puncture) व्यध् (c. 4. विध्यति, व्यद्धुं), तुद् (c. 6. तुदति, तोत्तुं), वितुद्, छिद्र् (c. 10. छिद्रयति -यितुं), भिद् (c. 7. भिनत्ति, भेत्तुं), निर्भिद्; 'with a thorn or sharp-pointed substance,' कण्टकेन or शल्येन व्यध् or वितुद्; 'with a needle,' सूच्या व्यध् or भिद्.—(Pain by puncture, sting) व्यथ् (c. 10. व्यथयति -यितुं), पीड्, तप्, सन्तप्, मर्म्म व्यध्.—(Goad) प्रतोदेन तुद् or वितुद्.—(Incite) प्रेर्, प्रचुद्, प्रणुद्, उत्तिज्, प्रोत्सह्.—(Erect the ears) कर्णौ स्तब्धीकृ or उद्यम् or उच्छ्रि or उद्धी or उद्धीकृ; 'an animal that pricks its ears,' स्तब्धकर्णः -र्णी -र्णं, स्तब्धश्रोत्रः -त्रा -त्रं.—(Designate by a puncture) सूच्या अङ्क् or चिह्न्.

PRICK, *s.* (Puncture) वेधः -धनं, तोदः, सूचिः -ची *f.*, सूचनं -ना, व्यधः -धनं, उत्तुण्डितं.—(Instrument for pricking) तोदनं, प्रतोदः, तोत्रं, सूचिः -ची -चिनी -चिका, शल्यं, कण्टकः.—(Sharp pain) तोदः, शूलः -लं, व्यथा, यातना, तीक्ष्णव्यथा.

PRICKED, *p. p.* विद्धः -द्धा -द्धं, वेधितः -ता -तं, तोदितः -ता -तं, तुन्नः -न्ना -न्नं, छिद्रितः -ता -तं, भिन्नः -न्ना -न्नं, सशल्यः -ल्या -ल्यं, शल्यविद्धः &c., कण्टकविद्धः &c., सूचिभिन्नः &c.; 'at heart,' विद्धमर्म्मा -र्म्मा -र्म्म (न्), भिन्नमर्म्मा &c., विद्धहृदयः -या -यं.—(Pained) व्यथितः -ता -तं, अनुभूततीक्ष्णव्यथः -था -थं.

PRICKER, *s.* (Instrument for pricking) तोदनं, तोत्रं, प्रतोदः, सूचिः -ची *f.*, सूचिका, शल्यं.—(One who pricks) वेधकः.

PRICKING, *s.* (Act of piercing with a sharp point) वेधः -धनं, व्यधः -धनं, शल्यवेधनं, कण्टकवेधनं, तोदः -दनं, प्रतोदः -दनं, सूचिः -ची *f.*, सूचनं -ना.—(Sensation of sharp pain) तोदः, शूलः -लं, तीक्ष्णव्यथा.

PRICKLE, *s.* कण्टकः -कं, शूकः -कं, सूचिः -ची *f.*, त्वक्कण्टकः.

PRICKLINESS, *s.* कण्टकितत्वं, सकण्टकत्वं, सशूकत्वं, बहुकण्टकत्वं.

PRICKLY, *a.* कण्टकितः -ता -तं, कण्टकी -किनी -कि (न्), सकण्टकः -का -कं, बहुकण्टकः -का -कं, प्रचुरकण्टकः &c., शूकी &c., शूकवान् -वती -वत् (त्), सशूकः -का -कं, बहुशूकः &c.

PRICKLY-PEAR, *s.* विदरं, विश्वसारकं.

PRIDE, *s.* गर्व्वः, दर्पः, अहङ्कारः, अहङ्कृतिः *f.*, अभिमानं -नता, अभिमानिता, मानं, मानिता, उद्धतिः *f.*, औद्धत्यं, चित्तसमुन्नतिः *f.*, चित्तोन्नतिः *f.*, मदः, गादः, दृप्तता, अवलेपः, अवहेला -लनं, अहम्मानं, अहम्मतिः *f.*, ममता, दम्भः, मन्युः *m.*, आत्माभिमानं, उन्मादः, आटोपः, साटोपत्वं, प्रतिभानं, प्रौढता, धर्षः, प्रगल्भता, उन्मायः, शौटीर्य्यं, शौण्डीरता, आवेशः, उत्सेकः, उत्सिक्तता; 'pride of caste,' जात्यभिमानं; 'of riches,' धनदर्पः; 'of strength,' बलदर्पः, बलावलेपः.—(Generous or proper pride) अभिमानं, गुणाभिमानं, स्वगुणाभिमानं.

*To* PRIDE, *v. a.* (One's self) आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं), कत्थ् (c. 1. कत्थते -त्थितुं), विकत्थ्, both with instr. c. of the thing on which one prides one's self; आत्मानं मन् (c. 4. मन्यते, मन्तुं), अभिमन् with two acc., अभिमानं कृ; 'he prides himself on his learning,' आत्मानं विद्यया श्लाघते, आत्मानं पण्डितं मन्यते, विद्याभिमानं करोति; 'one who prides himself on his learning,' पण्डितम्मन्यः; 'she prides herself on her beauty,' आत्मानं सौन्दर्य्येण श्लाघते, आत्मानं सुन्दरीं मन्यते; 'one who does so,' सुन्दरीम्मन्या, रूपगर्विता.

PRIER, *s.* परकार्य्यनिरूपकः, परचेष्टानिरूपकः, परकार्य्यचर्चकः.

PRIEST, *s.* (Member of the Brahminical caste) ब्राह्मणः, विप्रः, द्विजः, द्विजातिः *m.*, द्विजन्मा *m.* (न्), देवलः, भूदेवः; 'who is learned in the Vedas,' श्रोत्रियः, वेदविद् *m.*, वेदविद्वान् *m.* (स्), मन्त्रविद् *m.*, मन्त्रज्ञः.—(Sacrificing or officiating priest) याजकः, याज्ञिकः, याजी *m.* (न्), यज्ञकृत् *m.*, होता *m.* (तृ), हविर्याजी *m.*, प्रवर्ग्यः.—(Family or domestic priest) पुरोहितः, पुरोधाः *m.* (स्), ऋत्विक् *m.* (ज्), कुलविप्रः, कुलाचार्य्यः.—(Spiritual preceptor, officiator in sacred offices) आचार्य्यः, उपाध्यायः, गुरुः *m.*, पुरोहितः, धर्म्माध्यापकः, धर्म्मशिक्षकः, धर्म्मोपदेशकः. *See* CLERGYMAN.

PRIESTCRAFT, *s.* पुरोहितछलं, उपाध्यायछलं, उपाध्यायकैतवं, उपाध्यायकपटः -टं, आचार्य्यकापट्यं, धर्म्माध्यापककैतवं.

PRIESTESS, *s.* याजिनी, याजिका, होत्री, उपाध्याया, धर्म्मोपदेशिनी.

PRIESTHOOD, *s.* (Office or character of a priest) पौरोहित्यं, पुरोहितत्वं, आर्त्विज्यं, उपाध्यायपदं, धर्म्माध्यापकपदं, ब्राह्मण्यं, ब्राह्मणता -त्वं.—(The order of priests) पुरोहितवर्गः, पुरोहितगणः, उपाध्यायवर्गः, याज्ञिकवर्गः, धर्म्माध्यापकवर्गः, धर्म्माध्यापकगणः, याजकसमूहः, उपाध्यायसमूहः, पौरोहित्यं.

PRIESTLY, *a.* पौरोहितः -ती -तं, पौरोहितिकः -की -कं, पुरोहितयोग्यः -ग्या -ग्यं, पुरोहितसम्बन्धी &c., याजकीयः -या -यं, याज्ञिकसम्बन्धी &c., उपाध्यायसम्बन्धी &c., पौरोहित्यसम्बन्धी &c., धर्म्माध्यापकसम्बन्धी &c.

PRIEST-RIDDEN, *a.* पुरोहिताधीनः -ना -नं, उपाध्यायाधीनः &c., पुरोहितवशः &c.

PRIG, *s.* दाम्भिकः, दम्भी *m.* (न्), रूपगर्वितः, दर्शनीयमानी *m.* (न्).

PRIGGISH, *a.* दाम्भिकः -की -कं, आत्माभिमानी -निनी -नि (न्).

PRIM, *s.* अतिविनीतः -ता -तं, एकान्तविनीतः &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मनियमनिष्ठः -ष्ठा -ष्ठं, सूक्ष्मादरशीलः -ला -लं, अत्यादरशीलः &c., अत्याचारी &c.

PRIMACY, *s.* प्रधानधर्म्माध्यक्षपदं, मुख्यधर्म्माध्यक्षपदवी.

PRIMARILY, *adv.* प्रथमतस्, प्राथम्येन, पूर्व्वं, पूर्व्वतस्, मुख्यशस्, मुख्यतस्, आदितस्, प्रधानतस्, प्राधान्येन.

PRIMARINESS, *s.* प्रथमता, प्राथम्यं, मुख्यता, प्रधानता, प्राधान्यं.

PRIMARY, *a.* (First) प्रथमः -मा -मं, प्राथमिकः -की -कं, आद्यः -द्या -द्यं, आदिमः -मा -मं, आदि in comp., पूर्व्वः -र्व्वा -र्व्वं, पौर्व्विकः -की -कं. —(Original) मौलः -ली -लं, मौलिकः -की -कं, मूलिकः -का -कं, आद्यः -द्या -द्यं; 'primary cause,' निदानं, आदिकारणं, आदिबीजं, आद्यबीजं. *See* PRIMITIVE.—(First in dignity, chief) प्रधानः -ना -नं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्रः -ग्रा -ग्रं, अग्रियः -या -यं, अग्र्यः -ग्र्या -ग्र्यं.—(Elementary) आरम्भकः -का -कं, प्रारम्भकः.

PRIMATE, *s.* प्रधानधर्म्माध्यक्षः, मुख्यधर्म्माध्यक्षः, प्रधानोपाध्यायः, मुख्योपाध्यायः, प्रधानधर्म्माधिपतिः *m.*, मुख्यधर्म्माधिपतिः *m.*